## ज्योतिषशास्त्रसम्मतप्रमाणानि

01.10.20

आगमप्रमाणम् —

आगमम् अर्थात् आर्षवचनान्येव प्रमाणमिति। आचार्य वराहमिहिरेण प्रोक्तं यत् ज्योतिषशास्त्रम् आगमम् इति। यथा —

ज्योतिषमागमं शास्त्रं विप्रतिपत्तौ नहि योग्यमस्माकम्।

एवमत्र ज्योतिषशास्त्रे बहुषु स्थानेषु आगमप्रमाणस्योदाहरणं प्राप्यते। यथा सूर्यसिद्धान्तोक्तग्रहाणां भगणोपपत्तौ पं० कपिलेश्वरशास्त्रिवर्येण उक्तं यत् - इह युगे कल्पे वा ग्रहाणामेते भगणा इत्यत्र तावदार्षवचनान्येव प्रमाणम् परन्तु गणितस्कन्धे उपपत्तिमानेनात्रागमो मान्य इति। वस्तुतस्तूपपत्त्या ग्रहादीनां भगणमियत्ताकर्तृत्वेनास्य न पुरुषसाध्य इति कथने नाल्पीयसी अपि वाच्यता भवेत्। यत् उपपत्तौ प्रत्यहं ग्रहादीनां वेधक्रिया भगणान्तावधि समुपेक्ष्यते इति, तावन्मन्दोच्चानां भगणा वर्षशतैरपि अनेकैः पूर्यन्ते, तत्कथमल्पायुर्नरो भगणानामियत्ताकर्तृत्वं पारयेत्। तेन तावत्तेषां ग्रहादिभगणानाम् आगमप्रमाणमेव मत्वा गणितक्रिया कुर्यादिति विदां मतम्।

एवमत्र स्फुटीक्रियते यत् आगमं प्रमाणं विना सर्वत्र युक्तिं वा प्रत्यक्षप्रमाणेन वा गणना न कर्तुं शक्यते। एवमेव अयनांशचलनावसरे आगमप्रमाणस्यैवोपलब्धिः भवति। यतो हि चाक्रिकात्मिका गतिः मत्वाऽपि यदि विचारः क्रियते, तदा मानवस्य परमायुर्मध्ये न किमपि अयनचलनस्योपलब्धिः भविष्यति। मानवस्य अल्पायुर्भूतत्वात्। अतः आगमप्रमाणेनैव गणना कर्तुं शक्यते।

P.T.O

01-10-20
2

भास्कराचार्यैस्तु ग्रहाणां मन्दोच्चानां च भगणकथनावसरे वासनाभाष्ये उक्तमस्ति यत् – ग्रहमन्दशीघ्रोच्चपाताः स्वमार्गेषु गच्छन्त एतावतः पर्य्ययान् कल्पे कुर्वन्ति इत्यत्रागम एव प्रमाणम्। स चागमो महता कालेन लेखकाध्यापकाध्येतृदोषैः बहुधा दोषयुक्तः जातः, तदा कतमस्य प्रामाण्यम्। उपपत्त्या ये सिध्यन्ति भगणास्ते ग्राह्याः। तदपि न यतो अतिप्राज्ञेन पुरुषेण उपपत्तिः ज्ञातुमेव शक्यते। न तथा तेषां भगणानामियत्ता कर्तुं शक्यते। पुरुषोऽल्पायुष्ट्वात्।

एवमेव ब्रह्मणो आयुष्कालस्य किं गतमिति विषये प्रोच्यते यत् – 'ब्रह्मणः आयुषः कालस्य किं गतमिति न वेद्मि। तत्र केचिदाचार्या आयुषोऽर्धगतं केचित् सार्द्धवर्षाष्टकं गतमित्यूचुः। तत्रागमप्रमाणम्। इहागमद्वैविध्ये किम् प्रमाणमित्यत्रास्माकं नाग्रहः'।

एवमेव बीजकर्मणि आचार्यभास्करेण प्रोक्तं यत् इत्यत्रागम एव प्रमाणं नान्यत् कारणम्।

सौरसिद्धान्ते ग्रहाणां मन्द-शीघ्रपरिधिप्रसङ्गस्योपपत्तौ विषम-पदान्ते परमफलस्योपलब्धिः अल्पीयसी एवञ्च समपदान्ते फलमधिकं जायते। तत्रोक्तं रङ्गनाथेन यत् – युग्मान्ते फलाभावात् एव परिधयः कथं सम्भवन्ति, अतो विषमान्ते परमफलस्य सत्त्वात् तत्र एव उक्ताः परिधयः शनि-मन्द-शीघ्रपरिध्योः क्रमेण आधिक्यन्यूनत्वं च संज्ञाव्याघातात् असुक्तमित्यादि नाशङ्कनीयमागमप्रामाण्यात्। आगमं यत्र प्रमाणं स्यात् युक्तिः का तत्र नारद इति ब्रह्मसिद्धान्तोक्तश्चेति सूचितम्।

डॉ० सुदिष्ट कुमार
सहा० प्राध्यापक (ज्योतिष)
रा० उ० सं० महावि० सुखसेना,
पूर्णियाँ।

युक्तिप्रमाणम् ——

युक्तिप्रमाणं अर्थात् उपपत्तिप्रमाणम् । ज्योतिष-शास्त्रे युक्तिप्रमाणस्यैव सर्वाधिकं महत्त्वं विद्वद्भिः स्वीक्रियते। विशेषरूपेण इदं प्रमाणं सिद्धान्तज्योतिषे अङ्गीक्रियते, यतो हि तत्रोक्तग्रह-गति-स्थिति-कक्षा-दिनमानादि-व्यवस्था-आदिस्थितयः च उपपत्तिबलेनैव सिद्ध्यन्ति। प्रायशः सर्वेऽपि ग्रन्थकाराः स्व-स्वग्रन्थे अस्यैव प्रमाणस्य वर्णनं प्रदत्तमस्ति।

यथोक्तागमे युक्त्यभावः प्राप्यते सिद्धान्तशिरोमणौ, तत्र ग्रहगतेरुपपत्तिलाभाय ग्रहा नीचोच्चवृत्तेषु भ्रमन्तीति प्रकल्पितं तैः। परमत्र कल्पने मन्द-शीघ्रकर्णयोर्भेदा-पत्तेर्व्याकुलत्वप्रसङ्गः। तद्दूरीकरणाय पूर्वाचार्या अप्यसमर्थाः। यथोक्तम् —

स्वीकृताभ्यां प्रथमं फलाभ्यां ततोऽखिलाभ्यामसकृत् कुजास्तु।

'नाशङ्कनीयं च चले किमित्थं यतो विचित्रा फलवासनात्र'

इत्यत्र भास्करसदृशाः भास्कराचार्यः कथमत्र असमर्थः जातः इत्यत्र अस्ति किमपि वैशिष्ट्यं यत् विद्वद्भिः ~~भास्कराचार्यैः~~ अन्वेषणीयम्।

एवमेव बहुषु स्थलेष्वपि युक्तिप्रमाणस्य अभावः प्रतीयते।

आधुनिककरणग्रन्थकारः केतकस्तु ग्रन्थस्यारम्भे प्रोक्तं प्राचीनसिद्धान्तस्य युक्त्यभावः एव मुख्यकारणम् अस्ति। यथा—

विच्छदक्रमिति ----
अर्वाचीनमतं प्रतीतिजनकं खेटस्थिते साधने
सिद्धान्तोक्तमुहुः कृते निरसकं चास्मिन् मया स्वीकृतम्।

डॉ० सुदिष्ट कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ०सं०महावि० सुखसेना,
पूर्णियाँ।